नं॰ ५६५६-घ

श्री कामेश्वरकवचम् (तन्त्रम्)

पत्राणि ५. (सम्पूर्णम्)

नं० ५६५९-घ

~~श्रीकामेश्वरकावचं~~म (तन्त्रम)

पत्राणि ५ (पञ्च) (सम्पूर्णम)

~~नं० ११९९~~

5659
F-5
Complete



श्रीकामेश्वरकवचम्

ॐश्रीगुरवेशिवायोंनमः ॐश्रीदेव्यैसदासुफलदायिन्यैन
मः श्रीदेव्युवाच भगवन्करुणांभोधेशास्त्रांभोनिधिपारग ।
दासीपरमभक्तास्मिवरंदातुमिहार्हसि श्रीभैरवउवाच कथ
यस्वमहेशानिकामितोवरमिच्छसि यत्किंचिन्मनसीष्टंस्यात्तदा
तुंतेक्षमोस्म्यहं श्रीदेव्युवाच कामेश्वरस्यदेवेशकवचंदेवदुर्ल
भं शीघ्रंमेदययाब्रूहियद्यहंप्रीयसीतव श्रीभैरवउवाच शृणु
ष्वपरमेशानिकवचंमन्मुखोदितं महाकामेश्वरस्यास्यनदेयंप
रमाद्भुतं यंधृत्वायंपठित्वाचयंश्रुत्वाकवचोत्तमं त्रैलोक्याधि
पतिर्भूत्वासुखितोस्मिमहेश्वरि तदेवंवर्णयिष्यामितवप्रीत्या-
वरानने रहस्यंपरमंतत्त्वंनदातव्यंदुरात्मने अस्यश्रीकामेश्वर

कावचमंत्रस्य श्रीदक्षिणामूर्त्तिऋषिः पंक्तिच्छंदः श्रीकामेश्व
रोदेवता श्रींबीजं ह्रींशक्तिः क्लींकीलकं चतुर्वर्गफलप्राप्त्यर्थंक
वचपाठेविनियोगः अथध्यानम् उद्यच्चंद्रसमानदीप्तिममृता
नंदैकहेतुंपरं चिद्रूपंभुवनैकसृष्टिप्रलयोद्भूतैकरक्षापरं को
टीचंद्रगलत्सुधाप्लुततनुंहारादिभूषोज्ज्वलं शूलंखड्गवरौतथा
भयकरंकामेश्वरंभावये ऐंकंकामेश्वरःपातुक्लींशिवोमेललला
टकं सौंःमेकर्णौचकामेशःतारंमेलोचनद्वयं श्रींगंडौमेमः
हाकालोह्रींनासांचंद्रचूडकः हंसेऊोष्ठौत्रिपुरेशःसमेदंतौचभै
रवः तंमेजिह्वांपातुदेवोमहाकामेश्वरःपरः संमोहनंसदापातुमहा
वटुकभैरवः यंमेस्कंदौसदापातुमहामृत्युंजयस्तथा ऊंमेभु-

२

जौंसदापातुश्रींदेवस्त्रिपुरांतकः संमेहस्तौत्रिलोकेशः हंन
खान्पातुसुंदरः चंदत्तःपातुशमेशोमंकुद्दिंकान्तिकांवरः लं
पार्श्वौपातुमेबालावंनाभिंब्रह्मभूषकः रंवस्तिंपातुमेदेवोयं
पृष्ठंविष्णुरूपकः ऊंशिश्नंपातुविश्वेशःश्रमृतेश्वरभैरवः यं
2 मेढ्रंपातुमेरुद्रोरंगुह्यंगुह्यकेश्वरः लंकटिंपातुमेनित्यंशिवः
परमकारणः वंऊरूत्रिसुराध्यक्षंलंजानूदेवपालकः मंजंघे
पातुमहिमायंगुल्फौसूर्यरूपकः श्रींजठरंहरःपातु[?]मनोग्र
हसुंदरः ऊंबुद्धिंपातुमेरुद्रःसौंःरसंदत्तजापतिः [?]रक्तंपातु
मेदेवःऊर्ध्वंचवह्निरूपधृक् ऐंमांसंगुह्यकःपातुमेरुःप
शुपतिस्तथा ग्रस्तिमेगिरिजानाथोमज्जांमेनीलकंठकः शुक्रं

भूतेश्वरः पातु मूर्धानं शंकरोवतु पादौ श्रीं सुंदरीशानो देवः
कालांतकः प्रभुः पादादि शिरः पर्यंत मघोरः पातु सर्वदा शिर
सः पादपर्यंतं सद्योजातो ममावतु प्रौढरूपः सदा पातु स्वाहा मे
सकलं वपुः कामेश्वरः प्रभाते व्यान्मध्याह्ने कालभैरवः सायं पा
तु कुलेशानो निशीथे निष्कलेश्वरः अर्धरात्रे वामदेवो निशांते सुम-
होदयः सर्वदा सर्वतः पातु ऐं ह्रीं सौं बीजरूपधृक् पूर्वे मामसितां
गे व्याद्दक्षिणे रुरुभैरवः पश्चिमे पातु चंडेशो ह्युत्तरे क्रोधभैरवः ऐ
शान्यां पातु चोन्मत्तः कपालेशस्तथाग्निके नैरृत्यां भीषणः पातु-
वायौ संहारकोवतु ऊर्ध्वं मे कालरुद्रश्च पाताले परमेश्वरः मध्ये स
दाशिवः पातु त्रिकूटेशः सदावतु दशादिक्षु सदा पातु महाकामेश्वरोव

तु विस्मारितंचयत्स्थानंयत्स्थानंनामवर्जितं तत्सर्वंपातुमेदे
वस्त्रिपुरःपतिरीश्वरः गृहेशर्वःसदापातुवहिःपायाद्वृषध्वजः पथित्रि
3 पुरसुंदर्यःपातुसर्वत्रसर्वदा रणेराजकुलेदुर्गेदुर्भिक्षेशत्रुसंसदि ।
द्यूतेमारीभयेराष्ट्रेविप्लवेवादिनांकुले कामेश्वरःसदापातुभय
स्थानेचसर्वदा इत्येतत्कवचंगुह्यंत्रिषुलोकेषुदुर्लभं मूलमंत्र
मयंदिव्यंत्रिलोकीसारमुत्तमं अदातव्यमभक्तायकवचंगुह्यमी
श्वरि अद्रष्टव्यमश्रोतव्यंदीक्षाहीनायमंत्रिणे परदीक्षायशिष्याय
पुत्रायशारजन्मने नदातव्यंनश्रोतव्यमित्याज्ञांमामकींशृणु प
रंश्रीमहिमानंचशृणुचास्यसुवर्मणः अदीक्षितोयदामंत्रीविद्यांगृ
ह्णुःपठेदिदं सुदीक्षितइतिज्ञेयोमांत्रिकःसाधकोत्तमः गुरुपूजांविधा

याद्यविधिवत्सप्रपठेत्ततः कवचं त्रिःसकृद्वापियावज्ज्ञानं चवापु
नः एतच्छतार्धमावर्त्य त्रैलोक्यविजयोभवेत् यःपठेन्मनसांत
स्तुरात्रौब्राह्मेमुहूर्तके पूजाकालेनिशीथेतुतस्यहस्तस्यासिद्धयः
दुःस्वप्नेबंधनेघोरेकांतारेसागरेभये रजःसत्वतमोरूपवर्मकामे
श्वरस्यतु कांक्षंतेमनसायद्यत्तत्तत्प्राप्नोतिसाधकः महाकविर्भ
वेत् मासात्सर्वसिद्धीश्वरोभवेत् कुंकुमेनलिखित्वावैभूर्जत्व
चिरवौदिने प्रातःकालेसुभर्त्तौचस्वर्णस्थंधारयेद्यदि शिखायांद
क्षिणेबाहौकंठेवाधारयेद्बुधः यद्यदिष्टंभवेत्तत्तत्साधकोलभते
चिरात् यद्गृहेवर्तते वर्मश्रीकामेश्वरदेवतं विद्याकीर्तिर्धनारोग्यं
लक्ष्मीर्वृद्धिर्नसंशयः विनाबलिंनसंरक्ष्यंकवचंसाधकोत्तमैः चेद्व

द्यंतत्सुतान्दारान्नायुर्भवत्यतियोगिनी बलिंदत्त्वापठेद्वर्मधारये
न्मूर्ध्निसाधकः पुत्रवान्धनवाञ्श्रीमान्नानाविद्यानिधिर्भवेत् इह
भोगान्समश्नातिपरत्रमुक्तिवाग्भवेत् ब्रह्मास्त्रादीनिशस्त्राणित
५ द्गात्रस्पर्शनात्ततः नाशमायांतिसर्वत्रकवचस्यास्यधारणात् मृत
वत्साबामबाहौकवचस्यास्यधारणात् बह्वपत्याजीववत्साभ
वत्येवनसंशयः रणेधृत्वाचरेद्युद्धंहत्वाशत्रूञ्जयंलभेत् जयं
कृत्वागृहंदेविप्राप्स्यतिसुखीनरः महाभयेमहाघोरेमहामारीभ
येतथा दुर्भिक्षेशत्रुसंग्रामेपठेत्कवचमादरात् सर्वंतत्प्रश
मंयातिकामेश्वरप्रसादतः कवचस्यास्यदेवेशिवर्णितंनैवश-
क्यते महिमानंमहादेविजिह्वाकोटिशतैरपि इदंकवचमज्ञा

त्वायोजपेत्तमन्त्रं शिवे सप्तलक्षप्रजप्ताऽपि तस्य विद्या न सिद्ध्यति अप्रदातव्यमिदं वर्म मंत्रगर्भं रहस्यकं अवक्तव्यं महापुण्यं सर्वसारस्वतप्रदं अदीक्षिताय नो दद्यात् कुचैलाय दुरात्मने नदीयं पराशिष्येभ्यो भक्तेभ्योऽपि विशेषतः शिष्येभ्यो भक्तियुक्तेभ्यः प्रदेयं भावनावशात् इति श्रीदेवदेवेशि वर्म कामेश्वरस्य तु गुह्यं गोप्यतमं गोप्यं कथितं तव भक्तितः इत्येष पटलो देवि परमाद्भुतकारणः कथितो देवदेवेशि तव भक्तिवशान्मया न वक्तव्यो न दातव्यो दीक्षाहीनाय पार्वति यथा वज्रोपनीयोऽसौ सिद्धयष्टकफलो मतः यावत्कालं भवेद्गुप्तस्तावत्तु फलदायकः न चेद्गुप्तो भवेद्देवि सिद्धिहानिर्भवेद्ध्रुवं रहस्योद्घाटनाय स्मान् महिमाही

यतात्मनोः तस्मात्सर्वत्र गोप्तव्यः साधकैः पटलोत्तमः य
थेष्टकामदेश्चेहपरत्र मोक्षदः प्रिये इतिश्रीविश्वसारतंत्रेपा
र्वतीपरमेश्वरसंवादे श्रीकामेश्वरकवचं संपूर्णम् ॥ ॥

5